काशकतालोकविरुद्धं अपिकविसमयसिद्धइत्यदोषः ॥६२॥ सदेति निशीथिन्यामर्द्धरात्रे सकलं वासरमित्युत्तरार्धे व्यपि ग्रहो
परागादिकं विराद्यैरस्थानं धर्मोशास्त्रप्रतिषिद्धमिति तद्विरुद्धमर्थः ॥६३॥ अनल्पेति अनुपमामस्यार्थः संधिविग्रहयानास
नद्वैधसंश्रयाः षड्गुणास्त एव षड्गुणास्तापर्येषां तेन्यत्रमहाबलस्यापि संध्यादिषड्गुणानुसरणमर्थशास्त्रेणविहितमिति
तद्विरोधः विधायेति कृच्छ्रवाद्यमहबराञ्चनं गागरामित्सनेनरमणीयतातिशयः ॥ अनंगांगरमिति पाठे नंगायांगमस्येम
स्यार्थः करजानखाः उल्लेखः क्षतानि खस्थानानि तु कक्षाकरोरुजघनस्तनपृष्ठपार्श्वहस्तकंधरास्तुनखराः खरवेगयोस्तु
रित्युक्तानि नखक्षतस्थानानि कृत्यैव समस्यागतः पार्श्वौजघनमूरू च स्तनगंडललाटिका इति वात्स्यायने के स्थप

८८

देनैवसमंकाव्यशास्त्रविरुद्धंवाऊम्रत्तावयवविशेषेनत्स्यविधानादर्थतःशेषेषुप्रतिषेधात्॥६४॥ अष्टांगेतियमनियमा
सनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौयोगांगानितान्यष्टाङ्गकयोगस्यपरिशीलनंमुहुराचरणंतेनतच्छी
लनेऽभ्यासरसोद्धृतेनदुःसाध्यादुःप्रापायासिद्धिर्मुक्तिःतस्याःसविधंसमीपवर्तिनंअसंप्रज्ञातलक्षणंपुरुषमात्रविश्रा
न्तमनोवृत्तिरूपंयोगंदूरेविरुधन्तमनपेक्ष्यैवअभिमतामिष्टांविवेकख्यातिंप्रकृतिपुरुषयोर्भिन्नत्वज्ञानरूपांआसादय
न्नसौसमाधिधनानांयोगिनांमौलिमणितारूढःहृष्टःविमुक्तइत्यन्वयः।अत्रमुक्तिसमीपस्थमसंप्रज्ञातयोगमनपेक्ष्यैवमो
क्षोयोगशास्त्रविरुद्धः।विवेकख्यातिःप्रकृतिपुरुषयोर्भिन्नत्वज्ञानरूपाततोवितर्कविचाराद्यनुसारिरूपःसंप्रज्ञातयोगःपश्चा
त्पुरुषमात्रालंबनस्वरूपोऽसंप्रज्ञातयोगःततोमुक्तिर्नतुविवेकख्यातिमात्रेणैवेतिहियोगःशास्त्रं॥६५॥प्रासादेतिशांतस्या
क्तिःकामदुघाःकामदाःततःकिंतत्त्वज्ञानंविनासर्वमकिंचित्करमितिभावः।अत्रसर्वेष्वर्थेषुततःकिमित्येकैवभंगिः।अथयेषक
थितपदस्यावन्तर्भविष्यतीतिचेत्।नपर्यायान्तरप्रयोगेपिभंगेरेकरूपतायाम्साकव्यान्नतःततःकिमित्यस्यस्यएतस्मात्किंइतःकि
मित्यादयःपर्यायाः।अयंभावःएकप्रकारकार्थाभिधानेऽनवीकृतत्वंभिन्नधर्मप्रकारेणार्थाभिधानेतुनवीकृतत्वमिति।अ

राम

८८

तएवास्यार्थदोषता॥६६॥ यदीतिसतामविषादितादिषादराहित्यंप्रकृतिरेवस्वभावस्तवनतानुश्रयीयातत्रहठंतत्रयंपरिरह
तीत्यादि अत्रहिसतामविषादितास्वाभाविकीतिनानुश्रयीययथाऽनतादेरहिकतादीतिविवक्षितंतत्रचननुःकिमित्यादिना।
किमङ्गनमितादिनवीकृतं॥६७॥ यत्रेतियत्रपदार्थेइतिविषयसप्तमीअनुल्लिखितंविषयावग्राहनविमर्शत्वंअक्षितोचन
यस्यअनुल्लिखितारम्भमितिपाठेनउल्लिखितानिर्दिष्टाआरम्भानामयस्यतत्तत्फलाभावेननामाग्रहणात्यत्रानुल्लिखितार्थ
मितिपाठेसतिसप्तमीअनुल्लिखितःअविभावितःअर्थःप्रयोजनंयस्यताद्दशंविधेर्निखिलंनिर्मीणंजगत्उत्कर्षंआभि
ज्ञात्यादेवस्तुनियोगिकल्पनंउपमानकल्पनंतत्यस्यपराउत्कृष्टानिदाकोटिःयत्संपदःजीवानांमनोरथगतीरप्युल्लंघ्य
याताःप्राणिनामनोगोचराअपिनभवंतितस्यमरणःचिंतामरणःआभासेनईषत्स्फुरणेनअमरणायोपिमरणत्वेनकल्पिताय
स्मायातस्तेषुअश्मत्वव्यवहारएवोचितोननुमरणत्वव्यवहारइत्यर्थःचिंतामरणप्राकृतमरणमरणनायांगरणानमनुचि
तभावःअश्मायाघारणःअमोक्तिरियंअत्रान्यापदेशोआभासमात्रेणमरणीकृतेषिनिवाच्यंगुणानरत्नावनेननिद्रा
निद्रायप्रतीतेःअनियमेनानिंदनीयानांगुणानांरत्नवच्छेदसम्प्रत्ययःतस्माद्धायामात्रमरणीकृताश्मसुमरणत्वस्यारम

८९

तैर्वेचिंतेति पठनीयं ॥८८॥ वंक्षेति मृगवां पियासुं राजानं प्रतिकस्याश्चिद्विरुक्तिः वंक्षु मथ्यमम्भोजन्मंमत्रापि श्लिष्टरूपकेण
वारापभिन्नसरस्वत्साख्यनघावासइतिभावः एवं मर्वेत्र सरस्वतीवागीनदी च शोरोगोरक्षोन रक्ष स्मरजित्करराप ङ्गनासा
दर्शनात् समुद्रविरोधित्वाद्वावाहोः काकुत्स्थो रामः तस्यतद्धं धनञ्जरे तेन नवीर्यस्मारकत्वं दक्षिरागरक्षिरारोदशास्यः स्या
नूरक्षः समेत रोगासमुद्रः मुद्रया सहितः पयोधिस्त्वनाहितमानघः सेनाश्चश्चमनहृदयः सधोस्वच्छेनिर्मलेमान संसरः
स्वात चश्रव्रशोरगएवैर्जिनियमोनवाचः वेष्यर्थान्तमनुनान्यजलाशयानामकत्वमनीतौपिपासातोचित्ताविशयाप्रती
तेः ॥८९॥ उपमामितिविद्रुमात्वभंजिकायाम्मृगाकावलीवियोगातुरस्यराज्ञोविद्याधरमल्लदेवस्येयमुक्तिः ॥ भोरस्याकाशे
संवोधनं उपमारात्रिः सांद्रैर्निविडैर्मसीकूर्चकैः मसीयुक्तनूलिकाभिः तत्रैव घकारिशास्त्रोक्तः दोषधमित्यर्थः ॥ अयशब्दो
वार्थेस्तु चतुश्चपीतिपाठः तत्र समुच्चयः चंद्रस्येवानयोः शोभाहेतुत्वात् हेष्टचंद्रमितिमुद्राचिह्नं एवं हि मुद्राकयोरन्यतर
रवैव्यर्थं स्यात् तस्माद्रङ्कमेव मुद्राकः संजातोयास्मिन्निग्धारेषयः अन्यसंवेधा दन्यत्र समुदितं चिह्नं मुद्राकः भावतोप
नीतं मुखं दशासु दिस्तु पश्यतः चंद्रादिभिरुद्दीपननयासंतापकैः क्रियमाणं प्रतिबंधमनुक्तरीत्यापहरतेत्यर्थः ॥ अत्रजौ

राम

८९

त्वीमिति रात्रिविशेषो वाच्यः। अपरविशेषस्य स्वतन एव श्यामतान्तत्राकं क्षाविरहान्न तमिस्रया। श्यामत्वेन श्यामीकरण
वैफल्यात् सामान्योपादानमयुक्तमिति भावः॥७०॥ कल्लोलैरिति। कल्लोलैर्वेल्लिताः चालिताः ये दृषदः तेषां कठोरप्रहारैरित्यर्थः
मकराकरः समुद्रः मावमस्थाः मावज्ञासीः कुतः इत्यत आह किमिति पुरुषोत्तमः श्रीकृष्णः पुरुषश्रेष्ठश्च अत्र कौस्तुभेनेति
विशेषणोरत्नवचनं नोचितं कौस्तुभमात्रस्योपकारकत्वेनान्यावमाननिषेधायोगात्। एकेन किं न भवतो विहितः सनामेति
पाठे तु भेदानवगमाद्विवक्षितनिर्वाहः॥७१॥ अर्थित्वइति। सीतामासो निराज्ञा रावणगृहनस्य शौष्कल्यस्य युक्तिः। प्रभोः स
मर्थस्य मन्त्रेषणान्याचकत्वप्रकटीकृतेपि फलप्राप्तिः सीतामाप्तिः प्रभो स्वार्थिनि फलप्राप्तिरावश्यकी उचितता च सा न ज्ञा
नानकेवलं फलप्राप्तिः किंतु दुस्यचनाटकाशिविराधेनङ्गाहं कुर्वन् विरूढचारित्रो यज्ञादिसंरक्षकः। तया कन्यया युक्तः एवं
परस्य उत्कर्षरूपं आत्मनः मानयशसोर्विध्वंसनं नाशरूपं च जनकेऽजन्माध्यवसायः। नादृशः स्त्रीरत्नं जगत्स्वामी दशमुख
इत्यनेन सकललोकवित्रासकत्वं रावणः विजिगीषुः मध्यमेऽसमने कथंचिदपीत्यर्थः। कथं मध्यम इति एतन् समुदायरूपेरणामर्षार्थे
केनेत्यर्थः। अत्र स्त्रीरत्नमिमस्यार्थ उपेक्षितुमितस्यार्थकांक्षति। अन्यथा कथं मध्यम इत्यनेनामर्षार्थकेनान्ययाप्रसंगः न हि स्त्री

रत्नस्य वा मर्षः किं तु नडुपेक्षायां ॥ ७२ ॥ आज्ञेति रावणाहृतं प्रति जनकपुरोहितस्योक्तिः भरणायिनीत्वेन रूपणादंपत्योरिवाविष्ट
इस्य च वनं शास्त्राणि च क्षुरितिव ड्रव चुनैकवचनाभ्यां सर्वशास्त्रविषयैकैकसमुहात्मवनज्ञानसूचनं । चलज्ञनवृत्तेन विग्रहा
धिकं यदंविलासस्थानं दुहितॄणां बलाद्रंग्याचनतुष्टंग्यंवंशोत्पन्नायकथं देयमतस्त्वाहक्के निति अत इहं गुरोनत्वभूपने
यद्यपि वीरचरित्रे संसेवबहुवा गुणानयापि वलवानेकोदोषस्तान पवदनीतिन्यायेन रावणस्तदुपेक्ष्यत इति स्याद्वेदेषनरा
वणाइत्यस्य भावः । रावयति लोकानिति रावणः अत्र जगदाक्रोदस्यापित्वादिना रावणस्यन्यास्त्वं विवक्षितं नतया च स्याद्वे
देषनरावणाइत्यत्र चक्रनुउनरिसारियोजितं समाधाने पर्यवस्यतीति दुष्टं उत्पत्तिर्ई हि राणान्वये चेमत्र्यरियोऽस्मेन तदभि
वञ्छितासिद्धिरेवन्य पदस्य पद्वदस्यदोषत्वं न च मकाशितविरुद्धानभवः स्थानविशेषयोगमनपेक्ष्यतस्य मव्द्वेनेः ॥ ७३ ॥ अ
तेनेनिष्कतं विघास्त्रवणा व्युसनं घूता दिमदो यौवनादि जन्मा समाधिर्धर्मे चिंता नयोनीति मार्गः । अत्र त्रियुनरुक्तिक्रियादीप
कं हृयक मावीजमिति उत्कर्षेरुत्कर्षस्य व्यनइमित्वडूर्निकृष्टात्रमवेशनविच्छेदस्य दिसमे । स्युक्त विधिरितिनन्नुविधेयत्वा
नवगमइतिविधेयाविमर्शोनामेदः । अत्र स्कनवधादिभ्यामुत्कर्षेभ्यः समभिव्याहृतेभ्योऽस्मसनम्रदनयोनिकृष्टयोर्विज्ञा

२०

राम
२०

नीयत्वं॥७४॥प्रयत्नेनेति द्रोणवधकुपितस्याश्वत्थाम्नो दुर्योधनं प्रत्याश्वासनोक्तिः स्तुतिभिः प्रयत्नेन परिबोधितस्त्वमिसन्व
यः। निद्रामित्यत्र न संयोगे द्वितीयाऽशेष इति वर्तमानसामीप्ये लट् तथा मिद्रास्य सिय थैवं प्रतिबोधनीय इत्यर्थः सुखेन
शयितस्त्विं राद्गुषसि बोध्यसे मागधैरिति युक्तः पाठः सोमकाः पांचालाः रिपुकाननेनाति गुरुः अत्र पाण्डवभयेनाद्यावधि
नवनिद्राभरे स्व बन्धयत्नमयाशमितेषु निःशंकतया निद्रारणस्त्वं प्रयत्नेन बोध्यस इति नास्येतया च शयितस्त्वं प्रयत्नेन बो
ध्यस इति विधिर्युक्तो न तु तत्त्वोशेष इति शयनस्य॥७५॥ वानेति वानाहारतये मादितीयानान्याश्वास्य समन्वकरणतया
न्वियंति अत्रं मेयः बर्हिणामस्त्राः चमस्मृगः कुरंकठिणं चर्मवसनं येषां ते लुब्धकाव्याधाः शाठ्येन धर्माचरणं दंभः तस्य
स्तुरिनमुत्कर्षं परहिंसारूपं जानन्नपि ज्ञात्वाऽसमीक्ष्यकारी मूर्खो जनः परमनार्थैः गुणानीहने संभावयति दांभिकेष्विति शेषः।
मृगचर्मवसनं मेघतोयकणिकापानं वायुभक्षणं चेत्युत्तरोत्तरं तीव्रमिति त्वत्क्रमेणाविधियुक्तः॥७६॥ अरे रामाहस्ताभरणे
ति विरहिणाः पुरूरवसः इयमुक्तिः रामाहस्ताभरणेनेतत्तदागमनस्यात्र संभावितत्ताभसत्ताभ्रमराः अपनेन शरणागमनंपो
पनाउद्दीपकत्वतया स्मरक्रीडाव्रीडाशामकत्वं तेन नमस्तनोपकारकत्वं विरहिण्याराणां दमनत्वं तत्समपक्षताम् हंसेश्च पुनः उत्तमेभ्र

८१

९१

षणांकं पयुक्तं पत्रनीलोत्पलसखे हंससखेदः अनतंडुवदना उर्वशीक्व नत्क्व यया मदीयं मोहं स्तययहृदीकुर्विस्ययेः। अत्र वि
रहिमारणस्मनेस्पनुवादः कथयेत्युक्तेडुवदनेति विधिविरुद्धः॥ ७७॥ त्वमसि मित्रमारभ्यानमितेदम हृत्तमवेति हननं हिंसा सुरत
क्रियारूपयोनिमध्यताडनं चुम्बनं त्वमन मानितः क्रियात्मानि अविवरं छिद्रं वरांगं च पातोपचयः धातुस्पागजानिमशेऽपि
स्पचा उन्नतिरूपचयः रागो इत्येकेणाहद्धनाच अत्रपुंव्यंजनस्यापि प्रतीतिः॥ ७९॥ तस्मादतिस्पष्टं अत्रावेतसस्यकरणेस्थितम
वस्थाकरणपदोपादानेनावगम्यतेतदवगत्यां किमप्रयोजनमिति चेद्दूर्शनीयात्कर्षः कथमिति चेन्नसरूपतोस्य भूषणोजेर
त्वं किंतु तत्करणावस्थीत्येतिपर्यवसानानात्॥ एवं अवराकुंडलपदेपूमस्यं॥ ८०॥ अप्रवेनि। अप्रवेशम धकेरोयप्रामोदः मोदि
नाः सुगंधिताः पाठांतरे आलापो भाषणं तेन मोदिताः हर्षिताः दिशो येः भृंगैः मुरवराः शिरः शेरवेण शिरोभूषणेन शोभि
नः पुरुषा आगता इत्यन्वयः केचित्तु भृंगाः कतीरः मधुरालापे इति पाठइत्याहुः अत्र शिरःपदोपादाने शेखरस्वाम्यमात्रं लभ्य
तेन तु मुदलंकृतत्वं तथा च तन्न प्रतीतिदोषत्वं॥ ८१॥ विदीर्णेति आदौ विदीर्णाः पश्चादभिमुरवायेऽणतयस्तैः कराले भीषणे
विदीर्णा विक्षता अभिमुखायेऽणनयइतिवा किरणा व्रणाः अत्र धनुःशब्दो ज्यायाः आहदलप्रतिपादनाय तत्त्वकिरणस्यप्र

राम

८१

स्तरक्तत्वप्रतिपन्नये। ८२। ज्योबंधे इति ज्याबंधेन निष्पन्दाः निष्क्रियाः भुजा यस्य तेनेत्यर्थः यस्य कार्तवीर्यस्य कारागृहे इति सं
बंधः अत्र केवलो ज्याशब्दः प्रारोहत्स्वरेषं गविभ्रमप्रतिपत्तिनिविभ्रमाः विलासाः प्रारोहत्स्वरपरिष्वंगे ये विलासा नायिकायाः
तेषां प्रतिपन्नयः ज्ञाना नीलसताशोभमानेन अत्र हारशब्दस्य मुक्तासंदर्भे शक्तत्वेपि न मुक्ताशब्दवैयर्थ्यं अन्तरत्वाभि
व्यक्तत्वप्रतिपादनेनोत्कृष्टायामुपयोगात्॥ ८३॥ सौन्दर्ये इति यस्य सौन्दर्यातिशयः मारुरूपं चास्तीति शेषः तेऽनुभवैकवेद्याः वि
लासाः सा पुष्पमाला षट्पदानि वक्रान्ताकर्षेतीत्यन्वयः अत्र मालाशब्दो यद्यपि पुष्पस्यैव वस्तुजिह्नातस्तथापि न पुष्पपद
मपुष्टार्थं लक्षणयोत्कृष्टत्वनिष्पादकत्वात्। ८४। चरणेति चरणत्रमुपानन्ननेनयन्नपरित्राणानिह हि नाम्भांसकुटं स
वेगं अत्र हि चरणत्रेत्यादिपदविशेषणानां क्रियाविशेषणाहेमिति प्रकाशहत॥ ८५॥ चंद्रमिति पद्मगुणान्सौरभादीननु
केऽनुभवति अभिख्या परमा शोभा लोला चंचलाया अपि नाहृशमीतिदानेनो मामुरवस्योत्कर्षः रात्रौ चंद्रगताया पद्म
गुणानामुपभोगे पद्मसंकोचो हेतुः दिवा च पद्माश्रितायाः चंद्रगुणानामुपभोगे चंद्रस्य निष्प्रभत्वं कारणं तेन चातिप्रसिद्धेरेवाव
गम्यते इति न तदुपादानापेक्षा स दोषः॥ ८६॥ मृगेति सुत्रामा इंद्रः अत्राङ्गनाङ्गेगोत्सवामपराणि स्फूर्तिकण्डुमनसंसक्तमयु

त्वानि तु करणे चैषामिति नञ्स्कन्निकङ्कुमुनिकुल्लवर्णादीनां पुरोवादश्चानुवादे पि रूपान पायाभ्युपेयं न दोषस्तेति चेन्नात
स्य शब्दस्यानयावक्रमशक्यत्वेन श्रोतुर्वैमुख्याद्यभावेनादोषत्वादित्याहुः। दोषत्वाभावमात्रमिति निरसोत्कर्षोपकारित्वा
भावादित्यर्थः। भाक्रमश्च इति सक्तनरसोत्कर्षकत्वादिति भावः। कष्टत्वमर्थस्य दुरूहत्वं शब्दस्य क्लिष्टत्वं दीधीङि क्विर्म
दभागपः पश्चे गुणाधर्यादयः। वृद्धिः समृद्धिः पक्षे गुणोऽदैङ्गेवृद्धिः। अादेचादी धीवेवीटामिति निषेधान्। अभाजनमना
श्चयः कश्चिद्दुर्जनः। क्विप्यनन्त्यनिमः सर्वेन श्रयत्तलोपः। यत्र संनिहिते सति न मे गुणवृद्धी स्याताम् यः क्विपि परे किमिचे ति निषेधा
दिति भावः। अत्र क्लिष्टत्वेनार्थप्रत्ययेऽपि व्युत्पत्तिकरणाद्युत्पत्तिशायमतीनिर्गुणत्वमिति भावः॥ ८८। यशांसीति समस्या
सेसंस्पृष्टवात्संस्मरंदेशज्ञा सुनिरोद्धा रिरसेवं गेपत्स्य गुणात्तंक ठिनशब्दस्यन रूतोजोगुणाभ्यंजनद्वारात्र संज्ञकत्वात्। न
यावात्वष्कनिकङ्कुनानावृत्तौ वैयाकरणसामाजिकस्यवक्तुस्य निज्ञानेन नचमत्कार इति वो ध्यम्॥ ९०॥ अत्रेति रामं प्रति
कुद्धाया स्ताडकाया वर्णनमिदम्। अत्रैषेप्रोतानिग्रथिनानि वहन्ति यानि कपालानि शिरोस्थीनि नलकानि जंघास्थीनि
चतान्येव क्रूरं यथा तथाक्वणन्ति कंकणानि नहलं चलं चलव हम्भूषणरवैः करणैः। अत्र वर्णघोषयंतीमतिद्वनिव्यासंकुवेनी

सृष्टं पीतं पश्चाच्छर्दितं वान्तं तेन नु घनातिशयः। ताहृक्यद्रूतं नरैश्चकर्दमः तेन घनो व्याप्तोयः प्राग्भार उत्तरकायः तत्र घोरं य
यास्यात्तथा उद्धृसं नीतो व्याप्तो लोलौ चंचलौ यौ स्तनौ तयोर्भारेण भंगुरं वपुर्यस्याः सा रयेण उद्धतं यथा तथा धावतीत्यन्वयः। घो
घोरेति पाठे भा घोरे निरंतर क्षरणात्तेनघोरा विति स्वन विशेषणं। ओजस्विनि सिंहारावाच्यपि तस्य गुणात्वं यतो मूसरणाच्छ
ब्दमयोगे नोर्जितो प्यर्थोमहुवङ्कासेत्या॥१२॥ मातंगाइति वल्गितं गतिविशेषः बृंहितेरिति पाठे करिगर्जितमित्यर्थः। आडंब
रः समारंभे फेरु गर्जितं सूर्ययोरिति विग्रहः मदं गर्वं किंवृजंतं कोपस्य यत्राटोपः उद्रेकः सेन उद्यंत उत्थिताः सटानां ग्रीवा
रोमंगं कोटयोग्रभागा यस्य स मुद्रशब्दसदृशा गंभीरशब्दं कुर्वंतिद्वितीयगर्जितपदं सफलं तत्परं अत्र सिंहे ओजस्वि
वाच्यतत्त्विस्पोजो गुणप्रकाशकादीर्घसमासविकटवर्णाश्च गुणाइतिभावः॥१२॥ रक्तेति विरहिणः पुरूरवस उक्तिः रक्त
स्तहुणः अशोकोवृक्षविशेषः अनुरक्तः शोकापनोदकश्च तोहृष्टेति सत्त्वपि नुमितिशेषः। वाताधूतस्य वशिरसः क्रोधाद्वा
नयाधिकं पित्तस्तेनोक्तिः मिथ्यात्वं समर्थयति उत्कंठेति उत्कंठा घटमाना सद्दृष्टा शिष्टा सत्यामिलितावायभ्रमरास्तेषायाः स
घट्टगाढमिलनं यत्र स चासावर्थीत्तेरेवर एष्ठ दत्वेति विग्रहः दष्टः मकरंदस्यामाप्त्या अयं अहष्टष्टवैः अत्र भ्रमरगणगम्य

९३
93

विप्रलंभानौचित्येपि प्रस्तुत शिरोधूननप्रभृति पादितत्स्वर्शनापलापप्रादुर्भूतक्रोधप्रकर्षकत्वाद्दीर्घसमासविकटवर्णयोगेण
त्वमेनागस्य क्रोधस्य प्रकर्षोद्दीपिनो विप्रलंभस्यापि प्रकर्ष इति बोध्यम्। ९३। शीरीतिमदृशरहृक्षमृत्स्ययेस्मानि तस्य घर्मांशोः सू
र्यस्य घृणयः किरणाः वृशीघ्रं अहोदुरितं नन्दित्यानकुर्वन्त्वित्यन्वयः यः एक अस हायः अघौघः पापसमूहः विदीर्णो नास
चरणहस्मान्नु ब्रणायुक्तैः रपघनैरवयवैरुपलक्षिता मूर्छिताभिरिति पाठे जुगुप्सा विषयेरित्यर्थः लज्जारोगतनीयाद्दुःखाद्दृढे
रंवतवृद्धारिध्वनिस्महन्त अप्रकृः वर्णप्रतिभारहितः घोषायेषां नाच दीर्घः। आघ्रातं म्वासोयेषां तान्। आघोघैरिति स
वेत्रान्वपि। उद्घाघयन्त्व्याधिनिर्मुक्तान्कुर्वन्त्घटयन्ति नवीकरोति का दृशास्या अनः स्वयेहि गुणाघनातिशयिता याघृणा
रूपानन्निघ्रात तायत्ताविघ्नरहितारत्निर्यस्यतस्य काद्दृशाः सिद्धसमूहे हैनाः अघायेषां घर्घरो वलवृद्धारिध्वान इति विश्वः
उद्घाघो निर्गतो गदादिस्य मरः। नीरसत्वं चात्रानुप्रासमात्रमग्नतया सूर्यस्य दयावीरत्वेन दयावीररसैतात्पर्याभावात्। न
चानुप्रासास्यैकत्येवगुणत्वं सोध्येष्टवेदानिस्यादावपि तदापत्तेः न च परुषवर्णत्वमनुप्रासमयोजकं येन तद्दुष्टकतया
अदोषत्वं स्यात्। ९४। येनेति अत्र विस्तु पञ्चोसमाधवस्तामवव्यात्। रञ्जनुमालस्मीतस्याः धवः पतिः येन अनः शकटं ध्वस्तं

राम

९३

पातितं।अभवेनअजेननभवःसंसारोयस्मात्ताहृशेनवायेनबलिजयनशीलःकायःपुराऽमृतहरणप्रस्तावेस्त्रीरूपतांप्रापि
तः।योऽगंगोवर्द्धनंगांपृथ्वींचदधारकृष्णवराहावताराभ्यांयःअंधकानांयादवानांक्षयंमुशलाहरणेमनाशंवाकृतवान्
यःमयूरपक्षप्रियःशशिमत्राहुस्तस्यशिरोहरइतियस्यस्तुत्यंनामामराआहुः।यःउद्वृत्तभुजगहा।भुजगान्हन्तिसोभुजं
गहागरुडःसउद्वृत्तोयस्यउद्वृत्तभुजंगहेतिपाठेउद्वृत्तकालियभुजंगहंतारवेशाद्व्रजस्त्रियात्रेयायस्यसर्वदःसर्वदाताशिव
पक्षेउमाधवःसर्वदाऽस्मान्येनध्वस्तमनोभवेन।नाशितकंदर्पेणबलिजितोनारायणस्यकायःपुरात्रिपुरनामकदैत्यवध
कालेस्त्रीकृतःशरीकृतः।योगंगांभागीरथींदधारउत्तमांगेनेतिशेषः।यःअंधकनामकदैत्यस्यनाशकर्ताइष्टानिभुजं
गसंबंधिहारवलयानियस्य।बर्हिपत्रंवाहनंयस्यसकार्तिकेयःप्रियोयस्ययस्यशिरःशशिमच्चंद्रयुक्तंयस्यहरइतिस्तुत्यं
नामामराश्चाहुः।अत्रमाधवपक्षेशशिमदंधकक्षयशब्दावप्रयुक्तनिहतार्थौ॥२५॥करीतिकरिहस्तोनामः।तर्जन्य
नामिकेयुक्तेमध्यमापृष्ठतस्तयोः।करिहस्तइतिप्रोक्तःकामशास्त्रविशारदैरितिलक्षणलक्षितोकठिनयोनिशोधियत्ना
पादकः।हस्तिशुंडश्चतेनसंबाधेजनाकीर्णेयोनिसंकोचेचक्रांतःप्रविश्यविलोडिते।क्लेदितेसावकाशेचकृतेध्वजःपुरुष

२४

९५

रिंगं केतुश्च साधनं स्मरमंदिरं सेयं च शमकथास्वपीति वैराग्यहेतुत्वरोगोत्पादनादिति भावः। अत्र संवाधादिपदानि २६

उक्तानीति उक्तानः। विपरीतेन स्थितउच्छूनः शोफवान् तस्य विपाटितं यदुदरं तत्संनिभे तत्रे। इति स्वजन्मन्यपि जनत्वा स्त्रीत्वं रोगाव

रोगरूपे अत्र शमकथायामश्लीलत्वं गुणः तत्पोषकत्वात्॥ २७॥ निर्वापिनि वैरागी संवरस्तत्र धारोक्तिरियं शत्रूणांना

शायकृदु निर्वर्त्तितो वीशान्तवैराग्ययुः पाडुतनयाः स्त्रीकृतेन सहनेदंतु रक्ता अतु क्ताः प्रसाधितां अकुर्वे रागसाधिताः अयं रक्तं

रुधिरं तेन प्रसाधिताः अलंकृताः अन्यैर्यैः स्तनं तन विग्रहाः खंडितयुद्धाः खंडितशरीराश्च स्वस्याः स्त्रीयपक्षतोऽपि पेष्टं तिष्ठत्तिसुरिखनः

पक्षे स्वर्गस्याश्वविसर्गलोपाद्यैव रूपं अत्र प्रशमादित्तिस्वस्याद्यतिमरणार्थकत्वात् अश्लीलेऽपि भाव्यमंगलस्य च नाद्गुणः।

दुर्योधनामंगलस्य नायकमंगलत्वेन गुणत्वेवोध्यम्॥ २८॥ एत्रुकेतिराजगृहपक्षे एट्यूनि विपुलानि कान्ते स्वराणां सु

वर्णानां पात्राणि यत्र तत्तन्मध्यं चितः मरिडमाः निःशेषाः परिजना यत्र विलसंतीभिः करेणुभिः करिणीभिर्गृहनेवासं कवि

पक्षे एट्युकानां वालानां स्वड्डाधाधीनत्वात् स्वरपात्रं भुवि उषिताः निःशेषाः परिजना यत्र विले छिद्रे सीदंति विलसत्काः मू

षकाः तेषां रेणुभिर्गृहं तत्र एट्युकानितस्वरादिशब्दाः एट्युकानामानि स्वरः एट्युवहतं कान्ते स्वरे इति संदिग्धाः। २९। अत्रेमिति

राम

२४

भीमस्यकृत्स्नबंधनोद्यतंदुर्योधनंमत्वाकिंदुर्योधनःकृत्स्नस्वरूपंनजानातीतिनिष्टब्धंनसहदेवंमन्तीयमुक्तिः॥स्वात्मनिचिद्गगनेरेऽत्रा
रमंतेमत्वारक्षेन्द्रियाःसंततस्तेरेकतानाभवंतोऽत्मात्मारामाःयोगिनः॥आत्मैवारामःक्रीडास्थानंयेषामितिवानिर्विकल्पेआत्म
मात्रावलंबिनिमेदसंसर्गभानहीनेसमाधौध्याने।ध्येयध्यात्रोरेकतापत्तिरूपेविहिताकृतारतिःनिरंतराप्रीतिर्यैस्तेज्ञानोदे
कआत्मसाक्षात्कारदाढ्र्येनविघटितस्तमोग्रंथिर्मिथ्याज्ञानजन्यःसंस्कारोयेषांतेसत्वगुणाश्रितनिष्ठाः॥तन्मात्रविश्रान्ताः
यंकमपिवागाद्यगोचरंध्यायंतीत्यन्वयःकथंतत्स्वयंपश्यंतीत्यत्रहेतुगर्भंविशेषणंतमसांज्योतिषांवापरस्तादितिवर्तमा
नमितिशेषःरजस्तमस्पृष्टेरत्वम्भूमितिपर्यवसितं।तमीश्वरंअयंदुर्योधनःमोहांधः॥वस्तुतत्त्वमतिपत्तिरहितः॥पुराणा
पकृतेरपिप्राग्वर्तमानं।अत्रनिर्विकल्पकादिशब्दाःआत्ममात्रवृचनताशावर्थेयोगशास्त्रमात्रप्रसिद्धाः॥१००॥षड्डितिमा
लतीमाधवेकपालकुंडलायाःस्वयंपरामर्शोऽयं।षडधिकादशशोडशा॥इडापिंगलासुषुम्णाऽपराजितागांधारीहस्तिजि
ह्वापूषासुयशाःअलंबुसाकुहूःशंखिनीतालजिह्वाविजयाकामदाअमृतावहलाइमेवंरूपाःनासांपञ्चक्रेमणिपूरा
ख्यंहृदयस्थितंतन्मध्येस्थितआत्मास्वरूपंयस्याःहृदिविशिष्टंनिहितंरूपंज्योतिरादिरूपआकारोयस्याःईदृशोऽयस्तुहृदं

९५

95

तयाज्ञानवृंतासिद्धयोः रागीमादृयस्तद्धतात्रापि चलितं तंनिश्चलं चित्तं येषां तैः नाहँशेः साधकैरूपासकैर्लब्धमाराः अन्वि
ष्यमाणाः शक्तिभिः ज्ञानेच्छाक्रियाभिः परिणामैः व्याप्तः उपस्थितो वा शक्तिः पार्वती तस्या नाथः यद्वा तासामेव शक्तीनां नाथः अ
त्रापि भगवन्नगुणात्वं हास्यरसप्रधानानामिति उक्तिषु हास्यकरी विनिशेषः अधमप्रकृतीनां चेटविटविदूषकानां हास्यरस
प्रधानानां नैयैवौचित्यादोषत्वाभावे हास्यपर्यवसायित्वात्॥१०१॥ फुल्लुत्केति उत्प्रेक्षात्कर्कमलकूटनिभं वहंति ये सिंधुवार
विटपा मम वल्लभास्ते येगाल्लिनस्य महिषीदग्धः सहस्राक्षे किंच मुग्धविचकिल्लप्रसूनपुंजाः कतमाः शाल्लिधामानि कूर
भकं भाक्तेते देशीयमेनतत्विटपाः शाखाः शाल्मोदनसाहृश्यं प्रियत्वं गंजगाल्लिनस्य निजे लोकनस्य विचकिल्लमल्लिका वि
दूशाल्मभंजिकायां विदूषकोक्तिरियं सएन वेषभाषाभिर्हास्यकारी विदूषक इति नह्यक्षरांणां वाक्यदोषप्रतिकूलवर्णोपह
तत्वमविसर्गो विसंधि हतवृत्तानां निसत्वान्यूनपदानि मत्वं दर्शयतिन्यूनपदमपीति अत्र कतमभक्तमहिषीरुधिशब्दा
ग्राम्याः अपि विदूषकोक्तौ न दुष्टा इति भावः॥१०२॥ गाढेति अमरुककवेरिदं गाढालिंगनेन वामनीकृतो कुचौ यस्याः अनेन पी
नोत्तुंगकुचत्वं सा चासौ प्रकटं उद्भूत रोमोद्गमो यस्याः सा प्रियसंबंधेन सांद्रो निबिडो यो आनंदस्तस्मात् निरंक आधिक्यं तेन विग

राम

त्वात् स्त्रीमत् निजं गात्रं अङ्कुरं यस्याः सा हिमानद्दमानस्वराङ्कसन्मानदायकं च मा मां आयासय इति शेषः। मा निपीडय इति शेषः
अतुच्छस्मरसातिशयव्यञ्जनाय। अलमिति अत्रस्य स्थाक्षरो ह्येरिवनी सस्ते स्यादिना यक वितर्कः। सुप्तस्यापि अस्यासाय तु भ
वा हमत्तानु किं मन्नापि वहिरनुभूयते। तस्मात् अहं मनसीति। किं तु इयमनुपगः। त्वीन त्वजन्तुकाष्ठन्यायेन नाहं शोपि स्ययकं तु श
यनेन त्वा हविलीने इति श्रीरे त्वं वराव स्थिति इत्यर्थः। अत्र मामेने आयासय मानीन्यत्र पीडय इति न्यूनं न च दोषः। ऊटस्य धाहा
रेण मनीजेः स्फुटत्वान् स्मस्तु न गुणाः। रसातिरेकव्यंजकत्वान् हर्षसंमोहातिशयप्रसायकत्वेनेति भावः॥१०३॥ निष्ठेरिति वि
रहिणः पुरूरवस उक्तिः अभावेन तु हीनकरणात् विद्या पिधानं तिरोधानं स्वर्गायेति कर्मणि चतुर्थी। क्रियार्थोपपदस्य च कर्म
णि स्थानिन इति स्वर्गं गन्तुं उत्सुनिता उद्दे गमनानुकूलक्रियावती विद्धा देवाः। अगोचरं अविषयः। विधिः प्रकारः।
अत्रापि हिते मनं मरनेनन उज्झनेइ स्पेनेन्मरनं रवं द्वितीयपादे पिन चात्र गुणत्वविशेषवुद्देरनुत्पादनान्न नापि दोषत्वात्
अतिरेकेणापि दीर्घेन साकुप्पतीमादिमनीसानिःसेन कोमवशादित्यादिमनीनीनावाध्यत्वावगमादिति भावः॥१०४॥ यद्द
चनेति वंचनायां प्रतारणायां कृतबुद्धिः कार्योन्मुखः दुर्जनसमूहः वह प्रियवाक्यगर्भैः कृतनकं मिथ्या यद्वचनं ब्रवीति तत्

त्साधवः पंडिमानविदं तिइति नकिंतु विदं निनयाप्यस्परवलत्स्यकमलकमपि स्ते हं हवयाकर्जुनपारयंतीत्यन्वयः। अत्र द्वितीयं
विदंनीतिपदं अप्रयोगत्ववच्छेदकं प्रतिपादयन्न्यूनाधिकपदत्वेपि दुष्टं। यदुक्तं। विस्मये च विषादे च दैन्ये चाप्येवं यथा रसोपसा
रेण तथाहर्षे वाक्यमेकं द्विरुच्यत इति॥१०५॥ वदवदेति स्पष्टं। अत्र पादचतुष्टये क्रमेण हर्षभीतिविस्मयविषादेषु क्तौ वक्ता
रः॥१०६॥ सितेति। सितकरश्चंद्रः तस्य करवत्तद्रुचिरा स्वाप्लुष्टिका विभा कांतिर्यस्याः सेति कीर्तिविशेषणं। विभाकरः सू
र्यस्तत्सदृशा धरणीधरराजन्य इति तेन मता पित्तं पौरुषकमला पौरुषलक्ष्मीः सा कमलाम सिद्धा लक्ष्मीश्च तवैव नाम
स्त्यर्थः। पौरुषमेव कमलं अधिष्ठानं यस्याः सा लक्ष्मीरित्यर्थ इति केचित्। तन्न तथा सत्यर्थभेदेन लाटानुप्रासाना
पत्त्या लाटानुप्रासे कथितगुणपदत्वोदाहरणासंगतेः। अन्वयमात्रभेदे एव तस्य वृत्त्यमाणत्वात्। अत्र लाटानुप्रासः उ
त्त्मासमानुस्यैव निमित्तत्वात्। उपमस्य कांतिपरत्वेपि निर्वाहादिति भावः॥१०७॥ तालेति। व्याख्यातमिदम्। अत्र द्वितीय
कमलपदं सौरभादिमदर्थकतयाऽर्थांतरसंक्रमितवाच्यम्। तथात्वे च कथितपदत्वमेव प्रयोजकं॥१०८॥ जितेंद्रियत्व
मितिस्पष्टमिदम्। अत्र कारणमालायां पूर्वोपात्तपदेनैव विनयादिकमुपादेयं पादांतरेणानूद्यमानं तद्भिन्नतयैव प्रति

९६

96

राम

भातितथा च ताहृशालंकारसंपादकतयाउरागत्वं।१०९। भमम्भि इति। भ्रमामि अपहस्तितनरेखो निरंकुशो यथाविवेकरहितो
पि। स्वप्नेपि त्वयि पुनः प्रमोहि भक्तिं न प्रसरामि। हमीति पाठे भवामीत्यर्थः। काममति यौवनोन्नित्या यस्मिन्से केमत्तयानि
त्यादि सहचरसंपन्नो न प्रतिनरू रोनाक्रमितम्मेत्युरस्पति शिष्योक्तिरिस्पपरे। अपहस्तिता नानाकारेरखामर्यादा येन निरंकुशो
ऽनुरोधशून्यः। विशेषणानयस्याभिन्नार्थत्वं विसंप्रसरामीति वर्तमानसामीप्ये लट् प्रसरिष्यामीत्यर्थः। अत्रप्रतीहीतिह
उ प्रत्ययोत्पादकम्। यतस्तत्र न्यस्यप्रतीति परम्। तेन स्वोक्तेरमिथ्यात्वप्रतिपादकेन प्रतीहीत्यनेन शपथसमानशीलेन सो
हार्दविषयस्तावगमः। परन्तउपादानेनु पाद्धिप्याखेन प्रतीनोनर्दकंविलकर मितिभावः।११०। सव्रीडेति। नायकस्य संग
स्वदर्शनाद्व्रीडा। मातंगो गजः। तत्त्वमोविरदर्शनेन न कारुण्यं। विभवाभावेन शोकोदयात्। सर्पदर्शनेन भयं। अंबरस्थायी क
यमत्रेति। चंद्रदर्शनाद्विस्मयः। विस्मयस्यस्थापित्वेपि चमत्कारकारित्वेनोपचाराद्रसत्वं। पत्युरन्यस्त्रीसंगदर्शनादीर्ष्या मि
रिा स्थानेकपालदर्शनाद्भयं न च संगमे प्रीतिरुक्ता च। अत्र व्रीडादयो व्यभिचारिभावाः रसशब्देन भेदसंभवोऽनुभूयते किं
त्वनुभवादिमुखेन व्यक्तेषु। तस्मादास्वादानुत्पत्तिदोषत्वबीजमिति संप्रदायः।१०११। नामिति। अनंगसंबंधिजयमं

२७
91

गलल्लक्ष्मीरीषदुन्नतं यदुन्नमल्लंलोकितं हृद्यं यया न रवक्षता यवलोकनाय भुजमूलस्य किंचिद्रोन्नमस्य करणं तानेत्रयोर्गो
चरेह्रु नवनोऽस्य निरवच्छिन्नः कोऽपि रसः शृंगाररसस्य नवयुः पूर्वाहुदहीपनानिशाय॥ अत्र रसपदोपात्तत्वड्साक्षिणस्वावि
भावानुभावव्यभिचारिभिर्व्यंजनेन रसः किल्रास्वादापकर्षइतिभावः एवमन्येऽपि बोध्यं॥११२॥ आलोकेति को मल्लकपालनु
लेऽभिषीक्तः नल्काये पांडुतादर्शीनानरोमांचाञ्चिनाः भिव्यक्तो योऽनुरागस्तेन सुभगां दर्शनीयरूपां अभिराममूर्तिं
रमणीयनरावयवसंस्थानां तां आलोक्य सपत्नवाल्पं अजित त्सत्र अजितकामाविवर्तमानः पुलककदंबाञ्चिभिरीक्ष्यमानः
तरंगितं वेह्लितं अविच्छेदारंभमिति केचित्॥११३॥ संप्रहारेति युद्धइत्यर्थः। प्रहरणोः शस्त्रैः परस्परं क्रियमाणप्रहाराणां
रणन्नकिर्ण्ठरधूलिवद्धवलोपाधुनिहरस्तेन क्षालितं दिङ्मण्डलेशाशिनिसजितस्यप्रसिद्धताऽरापस्यप्त्नः) कारैरि
त्यन्वयः प्रहरणकरणकप्रहारजन्यझत्कारैरित्यर्थः उत्साहो वीरस्थायी प्रमादस्तस्य कोपभवविनिपातेन दोषः॥११४॥
कर्ष्टरनिकर्ष्टरधूलिवद्धवलोपाघुनिहरस्तेन सालितं दिङ्मण्डलेशाशिनिसजितस्यप्रसिद्धुताऽरापस्यप्त्नः नय
नावनैनानयनप्रसारणाभ्रूमौलीलाशिरोमुकनिवेशस्य याविशेषकृतिस्तया भङ्गास्तनोत्तनिर्यत्स्वाः साअभ्र

राम
२७

रित्यन्वयः नीलाशिरोंशुके स्पष्टुद्दीपनविभाव एव अत्र चंद्रोदय उद्दीपनालंबनविभावः शृंगारयोगपत्वं तु भावमनीता
आस्वादापर्यवसायिनः स्थिताः ११५ परिहरतीति वृत्त निस्पृहा रतिः मुनिरयोवधारणा विषमारूपा शाक्यैः अस देहमिति
कर्म्मः स्ववलजिदिति अनभीवितरणपथे परिवर्जितइत्यपि शृंकामिनीरूपो विषयलंभम शृंगारविभावोभिमतोनउनरूपानः न
चरतिपरिहारहेतुभिरनुभावे राक्षेतुमपिसक्यते नेषां करुणाभयानकवीभत्सेष्वपि संभवाशिनिउ दिस्यनाक्षेपात्किंतु
प्रकरणाघनुसंधानेन विलंबेनेनिकृष्टेन कल्पनीयः एवं च ननूक्तनएव आस्वादविघ्नः आपानस्यैव हूनास्यगमेन एक
तरविश्रांत्यभावादास्वादविघ्नइतिबोध्यं ॥११६॥ प्रसादेतिमातरस्य एकालानित्यतारूपइति उद्दीपनविभावइत्यर्थः ए
तत्प्रकाशिनइति कालानित्यताप्रकाशनप्रकाशितत्वेन निर्वेदस्य प्रतिकूलताप्रकाराणतरप्रकाशितत्वं तु कूलं एवं निबोध्यं
निर्वेदरूपः शांतस्यापारयव्यभिचारितोक्तिः स्वाश्यशृंगारापक्षेयतिबोध्य अस्यामनपरार्थोभ्देदश्विस्यइनिकश्वितानि
दुरजेरेति निमतरणालोचनयथ्यंपतिनेतरूणामध्येसनवंनीमालनीमतिमाधवस्येययुक्तिः ॥ स्वयंतिसुश्रीमवसुज्ञ
निसिंचत्तित्यन्वयः शांतेनतमेनतानइतरत्स्यष्टा अत्रप्रकृतेनेशृंगारेप्रतिकूलस्यशांतस्यप्रकाश्यमानकालानित्यतारूपा

विभावः एतत्प्रकाशितो निर्वेदरूपो व्यभिचारी च स्फुटमेव गम्यते ॥११७॥ निःश्वासेति निम्नतरमरोत्सोच न पर्यंपतितेगुरू
णां मध्ये सकलपरिहारस्य स्थायावनगमनमेवेच्छति वधूः। निम्नतरमुणाजारः गुरूणां मध्ये इत्यनेनान्यतंतनरत्वेना अ
न्यव्याजादिकं विना वनगमनं न सकर्षतेन तदानशंशातानुभावग्रहः॥११७॥ सर्वपरिहारस्य ज्ञातानुभावः। न च व्याजः अतिपारि
तइति श्रृंगारस्य प्रकृते नस्यविच्छित्तिः इथनाधानायनयव्याजेन संभोगार्थं वनगमनं यत्कृत्य तेन तदानशंशातानुभावग्र
हः॥११८॥ ओष्ठेत्युक्तेनेति नितरां सहसागमनारंभः अस्पर्शोषमयादितो पि संभवेन भयादुत्कंठा नो वेति संशयात्पन्न निर्ण
यइति। ओष्ठेत्युक्तेनेति। एवंव्यावर्तनेन स्पर्शकोपादिनापि संभवात् हियेन्तु कं सहमुवास्वाभाविका। नवोढात्वात्। वंधुव
धूजनैः भ्रातृजायादिभिः आभिमुख्यमिय स्यावरं श्रेष्ठपतिचं अत्र साध्वसस्य विकृतवरदर्शनादिरूपविभावाभा
वकृतसाध्वसलाभः सरोरुहस्तलनुभावमुखेन परिपोषः प्रकृते श्रृंगाररसप्रतिकूलमायइति इति तस्य शब्दाभि
धानात् तेन नवोढास्वाभाविककृत साध्वसलाभः सरोरुहस्तुलकाप्रियकरस्पर्शेन सात्त्विकभावोदयात् हसनात्। हासस्य
सोत्पादनाय अत्रोष्ठस्य शब्दवत्सहसाप्रसरणादिरूपोनुभावो नोष्ठस्य मसंदिग्धं प्रतिपादयितुमीष्टमयादिसाधा

रणातान्॥११९॥ पांडुरितिश्रीमृकंडुसूनोः सरसं सानुरागं अन्तरसहितं च अनवरतं संवासक्रियायामक्षमं मनितां नमिस्मृति
शयायैकसर्वोन्वयिस्रेत्रियः देहान्तरे चिकित्सः देहपर्यन्तस्थायीति फलितमु अत्र साधारणत्वं पांडुताहिरिति निर्विरुधत्वं॥१२
०॥ शिवसायुज्ययाक्रमं मेकदेहं विशेषणाम परं वीरविशेषणाम् पतितानां स्वदेहान्तरात्र पुरुषानित्यन्वयः। दिग्धानन्धा सान्
रजितवासितं वाक्कमध्यं वज्ञः। कल्पभुजामासाशिनारदगानास शोणितेः सरुधिरैः चंदनवारीणां सेकायत्र नाहवेशेः
कल्मलनाशवृडहूलानि पट्टवस्त्राणि नेयुर्को विमानम ध्येयः पर्यंकस्तत्र तल्पे स्थिताः ललनाः स्ववैरिणाः॥ अत्र पतित
स्वदेह स्वर्गंगानारूपात्लवनमेदस्थाव स्थितयोर्वीभत्सशृंगारयो रंतवीररसो निवेशितः॥१२१॥ रंतेति करजैः नखैः कर
णेन स्तीया विपाटितानि विदारणानि परपरित्राणाहृर्षात् अनुराग प्रकटानि विद्रुमाचनारक्ते रुधिरे मनोयस्मा
लयाम्नतुरक्तमनसाचमृगराजः सिंहः मणारवपुंजानिविशेषणं पञ्चवयमप्येवविधामभ्पास्मेतिजानसूहेः अ
पि विरोधगतस्पृहाणां मुनीनामपि तद्दुक्कान्त अत्र कामुकस्पंदनस्तन्दीनियर्याच मनकारकारणतयाजिनस्य
याचापरः शृंगारीतं स्ववलोकनान्स सस्पृहः तद्भनरणाहशोमुनयइति साविवक्षा॥१२२॥ क्रामन्न्यपूरिति दर्भांकुरैः क्षमा

भः। कोमलांगुलिभिर्भोगतलदृक्कैर्येषु ईदृशैः पाणिभिः यावाकैरिव पादैः कामेन्यः दर्भाः कुशांकुराः दावाग्निमित्यत्र परिनः
शब्दयोगे हुतीयाविवाहेलाजाहोमे एवं भावान् धूमेन गलद्बाष्पौ तु नाहमार्यदभैः स्वदभैताभमेः भरकरस्यापिन
स्वकराः अत्र राजसुनोयाराजविषयारतिमत्र करुणाश्रृंगारातुभावपि साच्छारंगामिमिनन्विरतहशोकव्याकुल
योः करुणाश्रृंगारयोरेकराजकार्याघ्नयोस्सक्षाद्राजसेवकयोर्मिथोविरुद्धयोर्भटयोरिव सहजनोविरोधोपिन
दोषाय॥१२३॥ एकप्रधानांगयोर्विरुद्धयोरप्यविरोधे हृष्टांतमाह पथ्येति। राही ति। आशेवगतहइत्यर्थः। अत्र एहीति
क्रीडं तिगछन्तिक्रीडं मीतिक्रीडापदयोरागमनगमनयोर्नविरोधः। मिलितत्वात्क्रीडातिशयकारित्वादिति भावः॥१२४॥ क्षि
प्तइति। हस्तावलग्नः क्षिप्तः हस्तादित्क्रमेणान्वयः। अवधूतो निराकृतः। आर्द्रापराधः तत्कालकृतापराधः। अत्र त्रिपुरारि
पुप्रभावातिशयस्य करुणांगं रिपुस्त्रीवैलक्ष्यस्य तत्कार्यत्वेन नद्याजकत्वात् श्रृंगारेण पुष्टस्य करुणस्य तन्श्रृंगारोंगं। क्षि
प्तत्वादीनां वीभत्सानुगुणानां श्रृंगारांगसाम्येनालंकारवद्धुत्कर्षकत्वात्करुणांगत्वादिति भावः॥१२५। *इतिसप्तमउल्ला*
सः। अपसारयेति। दूरीकुर्वित्यर्थः। घनसारः कर्पूरः घनोयः पिंडस्तकमलैः पुष्पैः जलमलम्भने आकिंनकिमपीत्यर्थः

अलमलमिति द्विरभिधानमवधारणार्थम्। बालानया विविधदुःखासहिष्णुः। अत्र रेफानुप्रासः शब्दमलंकरोति विप्र
लंभशृंगारगतमाधुर्यव्यंजकत्वादिति भावः॥१॥ मन इति। माधवानुरक्तया मालत्या लवंगिकां प्रत्युक्तिः॥ रागो मनस्ये
वकन्यकात्वेन सखीषु प्रकाशनोपायाज्ञानात् तीव्रं यथा स्यादेवं विसर्पति। सर्वतः संचरति। तीव्रमिति विषयविशेषणमि
त्येके। रागः कर्तातत उत्कर्षं प्राप्तः प्रमाथी क्षोभकारी विधूतः प्रज्वलितः अत एव निर्धूमं यथा तथा। यद्वा निर्धूमः पावक इव
ज्वलति। ततो प्युत्कर्षकाष्ठागतो गरीयान् सांनिपातिक ज्वर इव प्रत्यंगं दहति न स्निपीडयतीत्यर्थः। इत इत इति मौग्ध्याद्दंगघदर्शी
नेन तातः वरो न राजु सरणान्। राज्ञानुवर्तनाद्वा नो वा तयात दम्पति षेधात् न भवती मित्रोः सम्मते सख्याः प्रतिषेधासंभवात्। अत्र
विषमिवेत्यादिरूपमास्याचार्यमलंकुर्वाणा समुत्कर्षयति विषमिवेत्यादिपमा घंशेन विसर्पणादेरतिशयप्राप्त्या विप्रलंभोत्क
र्षादिति भावः॥२॥ चित्तं इति। चित्तं विघटते न तत्रुद्रयति सा गुरोः गुशय्या मुरलंठति विकसति दिङ्मुखेषु। वचनेव तते न भवति नेकाव्यं व
धे ध्याने न तु प्रतिभूत्सणानतरुणी प्रगल्भा विघटते च मत्करोति चित्तानुरूपव्यवहरति न तु घतिग्रणा विषयेहीनान भवतीति यद्वा त
दुराग्रहवशात् ये न रक्षवशा परान भवति शय्यां मुञ्चति बहुवचनेन विरहातिशयः स्तु रठति इ न तत्नः परिवर्तनेन दिङ्मुखेषु भव

१००
100

दिदृक्षया विकसति सादरमवलोकयति वचनेवर्त्तते विरतेमल्पपतिकाव्यमेवं धेमवहूरीणानां ध्यानेभवच्छिन्नायां ध्यानेनभवच्छिं
नयात्रु घतिकृशाभवतीत्यर्थः स्येकेहस्ताउक्तिः अत्र प्रसेनपरूषवृ गीरस्थ्यैनोज्ञोव्यंजकेनशृंगारः विप्रलंभः॥३॥मित्रेइतिस्त्र
त्रचक्रवाकगतविप्रलंभासः मित्रेसूर्येसहदिचक्रापि अज्ञानरूपेदेशविशेषेसरोरुहेस्पनेनएकदेशवासेनसुहृत्त्वांवद्ध
ननेपुष्टिनेशेनिनिवृएनाभ्यांमितस्यप्रतिकन्तुरभावंसहवासिपुचनयाविधयत्नाभावःसूचितः॥करसशब्दायमानेषुसर
स्सुचक्रेनेनक्रंदजनातरदर्शनेनदुःखातिरेकःवीप्सादर्पितेत्यनेननापिकासक्तनायकांतरदर्शनेनविप्रलंभोद्दीपनंसारसः
पक्षिभेदः वियोगिनाः संध्याकालकस्मिनचक्रवाकीविष्ठरवतांविसमृणालंआस्वादिनाभक्षिताउज्झितास्पक्ताः अर्गला
साहश्यपचक्रज्झलगलहारपिधानादिना। अत्रविसलताजीवंरोद्धुतुमेतिप्रवक्तानानरुग्णोपमा॥४॥अनंगेतिरंगोन्त
त्यस्थानंतन्मदृशं अत्रसमधावृत्तिः नरत्नभंवैकगोचरंनतांगपात्रांगभंगीभिः कशीकरणाहेमवस्नूनमनादिगतविशेषैः
तयांगीकृतं ययास्तनाभंगपः रूमांमनसिशंनापरः शृंगारस्तस्याचूतितंचितायेषुताहृशानिकुर्वतीत्यर्थः॥५॥मरुधी
मितिव्याख्यानमिदं॥६॥परीतितुभयनः पीनस्तनजघनस्थानयोः। वसतीयककुत्समदर्शनभीत्यात्तुज्झकार्येशायनात्तस्त्रं

राम
१००

नःशयनमध्यभागे।ततोःक्षीरस्यमभागस्यपरिमिलनंआमर्दनंअप्याहरिणंतथावर्गमिस्तः।विपरीतः।ग्लथंशिथि
लंअवलग्नयोऽसतांतांयथातथाअजलता।संबंधीयआक्षेपअभिधानस्तस्यवलनेः।संबंधेःकरयोः।वदति।आवेरय
ति।शयनंशय्या।केचित्तुआक्षेपइच्छाधीनचेष्टावलनंतदित्तरक्रियाहुंहुगर्भस्तस्यरूषइत्याहुः॥७॥मंथेति।मथामथनंद
डः।तेनायसंहूरमणिसंयदर्गाणांभसेनस्तनंत्वासयकुहरंतत्रचलनोमंदरगिरेर्योधानस्तद्दृढीरइत्यर्थः।मंथेनायस्ता
म्भांतेोयअर्णवस्तदंभः।सुप्ताकुहरेषुरंध्रेषुइतिवा।कोणाघातेषुसमस्तभेरीशतसहस्राणिढक्काशतशतानिच।एकदाय
त्रहन्यंते।कोणाघातःसउच्यते।कोणोवादनदण्डइत्यमेकोणोवीणादिवादनमित्यमरः।प्रकृतेत्वाघरएवसउच्यतेः।अ
मरेपिवादनमितिकरणात्सुटन्तमित्यमे।गर्जन्तोयेप्रलयकालीनामेघास्तेषांघटाःसमूहाः।तेषामन्योन्यंपरस्परंयःसंघ
ट्टः।सइवचंडःप्रचण्डः।कल्पायाःक्षेपघातकोधस्याग्रदूतः।भविष्यदर्थस्यप्रथमावेदकः।कुरुकुलस्यनिधानार्थीमत्तवे
उत्पातरूपोनिर्घातःउक्तो।वातःवातजन्योनिर्घोषोवा।मेघवातयोःसंघट्टजोध्वनिरशुभसूचकोऽभिघातउच्यते।केन।अनि
वलवता।असन्निहनादस्तस्यचयःप्रतिध्वनिस्तज्जन्यः।प्रतिध्वनेःसिंहनादेनसंवलनात्उरुत्त।डुंडुभिःतत्स्वरःताडितः

ताडनेनोत्पादितः। तेन मंदरध्वानप्रतिध्वनेः साम्यं प्रख्यरूपत्वादिति न च नहि द्वयोर्द्वंद्व मिति शब्दस्तथा। केनेत्यस्य केन कारणे
नेत्यप्यर्थो नष्टु दुष्टं ध्वयाप्रवृत्तत्वसंदेहात्। अभिनेयः अभिनयबोधनीयार्थः कः प्रतिकूलं। दीर्घसमासेनार्थप्रतिपत्तेर्वि
लंबात्। अभिनयेन ऊर्टिति प्रमाप्यनासंभवाद्बकोधाभावेन तद्ध्वजकदीर्घसमासारंभो नोचितप्राय इति भावः॥ ८॥ प्रोदंति प्रौ
ढेन वलवत्ताप्रयुक्तायंभ्रेदः। करणाम्रुत्यन्नात्ज्ञनकः रवद्भामि घातः जटनरूपं यद्वृच्छलनं ऊर्ध्वगमनं तेनजनितायो
रयोर्वेगस्तेन प्रवर्ज्ञायमानः वेगसारूप्ये रणैः सैंहिकेयभ्रमा घस्मरद्रुप्रधानत्रासस्तेनाक्रुष्टायेप्वासेस्त्रियंकृतेरारविरथोयेन
तेनार्णतो नेक्ष्मा रांक धरारंध्रभाजाम स्तनाभाकारैः भाभोरशब्दैः काकुस्थ्योरामस्तद्वीर्यस्त त्रिभिवकुवैक्त्र्। भीमं भयज
नकं उत्तमांगशिरः वियत् आकाशात्॥ ९॥ इति अष्टमउल्लासः॥ नारीणामिति नारीणांस्त्रीणामनुकूलमाचरसि चे
त्ज्ञानासि विज्ञोसि विज्ञस्त्वं स्त्रीणामनुकूलइति भावः। उत्तरंक चेतनः वामानां शत्रूणांहितमादधातिका आनादधा
तीति लभ्यते अबलाः स्त्रियः आस्वयंसमुदायोरूढः वलतेजो गुरविशेषश्च सामर्थ्ययुक्तायुक्तविचारानुकूलोमापारः
पुरंदरः इंद्रः॥ १॥ अहोइति दारुणाक्रूरा त्रिगुणास त्वरजस्तमोरूपगुणात्रयात्मिकाबुद्धिनत्वरूपा बुद्धेः प्रकृतिपरिणाम

तयात्रिगुणात्मकत्वमिति संख्यासिद्धांतात्‌ यादृशस्य गताहितस्यासुगताहितत्वगर्हीनगताहितत्वरूपगुणत्रयवती· दारुका
ष्ठं॥२॥ गुर्वीति परतंत्रः पराधीनः वैमेति खेदे· सुरभिर्वसंतः ललितः रमणीयः॥३॥ नतोरुणेति अरुणस्य सारथेर्नतस्य
येस्य परिस्पंदेन· ननु पूर्णोदयेन· मंदोविवित्सुः कामः स्मरः परिक्षामा· क्षीणा॥४॥ अपसारयेति घनसारः कर्पूरः यस्माने
ति र्वाधैर्नुहिनदीधितेरवदहनत्वं विधेयं उत्तरार्धे तु विपरीतं एवं च वस्तुत्वेर्यसमुच्चयाभावान्‌ उद्देश्यविधेयभावविपर्या
सेन शाब्दबोधरूपान्वयभेदात्‌ तात्पर्यभेदोऽत्रेति बोध्यं॥६॥ वदनमिति तस्याः वरतरुण्याः वदनं सुधाकरश्चंद्रः सत्यं उक्त
रूपकं निषेधति सुधाकरः चंद्रः पुनः कलंकरहितः कुभवेन्न न कापीत्यर्थः एवं चास्य मुखस्य रूपणायोग्यत्वमिति भावः व्यति
रेकालंकारोऽयं· अत्राद्यसुधाकरपदस्य तात्पर्यविषयाकत्वेपि प्राग्वदर्थाभेद· उद्देश्यविधेयभावभेदाच्च तात्पर्यभेद इति बो
ध्यं॥७॥ मितकरेति पौरुषकमला पौरुषलक्ष्मीः लक्ष्मीश्च न वैवे समर्थः॥८॥ सन्नारीति संतीं नारीं विभर्ति एवं भूताया उमागौ
रीतां याति यस्तं चंद्रशेखरमाराध्य त्वं पृथिवीजयकीदृशस्त्वं सन्नाः मताऽश्रीणाः भयत्रताहः शौरणाय स्पसः॥ अमा
य· मायाशून्य इति संबोधनं तनः रणान्‌॥९॥ विनेति अयं विश्वासो नाच विना पक्षिपुरुषः कर्मधारयेन· कर्तमानसंचि

जंनदेवमानंसंसरन्तस्मात्अरंशीघ्रंअदीपतअरंवज्रनकीदृशेनयमेनविनापञ्जिरूपेण·विर्भारंडसंज्ञकपक्षीनतु
ल्येनेत्यर्थइतिकश्चित्अनेनदुर्लक्ष्यत्वंपुनःकीदृशेन·एनःजनभोगस्थानंनृपतायद्वाअयंशुभावहविधिंविनाएनःपा
पंतत्फलनरकादिनयतायमेनेत्यर्थः·पुनः·कीदृशेनअसुखादिनाप्राणभक्षकेण·पुनः·कीदृशेन·स्वरवादिनाऽनयतास्तू
नंकुर्वता·कीदृशः·पुरुषःमहदुन्नर्वअज्ञानिक्षिपतियेदुर्जनास्तान्नोदीनदर्पसारकः·पुनःकीदृशःमहाजनःउत्कृष्टगु
णवान्·पूज्यमानानांरक्षितुमिच्छतासादंदुःखराणितस्यानीनिरंवंडनक्रियाविशेषणं।१०।सतुमक्रान्तोराजा।आरं।अरि
समूहंसर्वदाअवश्यंनिश्चयेन।भरतःअतिशयेनरणंयुद्धं।आसैषीत्प्रापितवान्कीदृगारंअवसंवत्सरहितंविमतार
वं।अतिशयकृतहाहाशब्दंकेचित्दृढंयंक्रियाविशेषणं।तेनसैन्यंविनैवसिंहनादंविस्मार्यरणसंचरणंचकारेस
र्थइत्याहुः।किम्भूतोराजा।अलसमरंअवानअगच्छत्शीघ्रंगच्छन्नित्यर्थः।पुनःकिम्भूतःएधितोऽस्यितःयद्वाऽस्थीनि
तस्यन्तिइति·अस्थितःनतुउपद्रवयेसांततेपिधात्तात्वाद्दीर्घाभावः।११।सात्विकमेरतः।सराजा।किम्भूतंआरं।अवश्यंपवश्प
नामनापन्नं।पुनःकिंभूतंअवलंवितंतारवंतरोभाविं·नम्रत्वंयेनअवलंवितानिवस्त्रानयास्वीकृतानितारवाणिवल्कलानि

१०२ 102

राम
१०२

येनेत्यपि कश्चित् । पुनः किंभूतो राजा सर्वदा रणे योयोमानस्तदिच्छाशीलः स्थानत्वेन समं स्थितं यस्य सः । अहितानां संताप
कारित्वेन स्थानत्वसाम्यम् ॥१२॥ अनंतेति अनंतेन महिम्ना व्याप्तविश्वं यया ताहशीम् यां वेधाः ब्रह्मापि नैव स्मर्तुं न
जानाति । यां च प्रणतेमानवेमानेव रदयां भजते ॥१३॥ यदानतइति । यस्याः पार्वत्याः मानतोऽयं जनः त्यागान्नियंनीतिनाशन
यातिकुतः नयेवास्य प्रभावहविधेर्दीनतः शिवेन शंकरेण हितां शिवेकल्याणेहितां कल्याणदात्री ॥ स्मरेणकामेनामि
ताम् । शिवमिमितमपरिच्छिन्नस्मरभावाम् । अहं स्मरामीत्यन्वयः ॥१४॥ सरस्वतीति । हे सरस्वति वाग्देवि प्रसादं स्वरगच्छ
प्रसन्ना भवेत्यर्थः मेमम चित्तरूपसरस्वति समुद्र इत्यतिस्वतिसद्वअतिशयेन कुरु देहेत्वं शरीरमेव कुरुक्षेत्रं क्षेत्रविशे
षस्तत्र सरस्वति सरस्वत्याख्यनदी संबोधनविशेषणानघाः समुद्रेवस्थान मुचितमिति भावः ॥१५॥ संसारेति शरत्कंदर्पेण
केब्रह्माणं दर्पयतीति कंदर्पस्तेन मदनेन दर्पेण दर्पवता साकं सह संसारः गमवतीकीदृशी शरतः संसारस्य सारसाः प
क्षिविशेषाः पद्मानि चर्तते सहितानवं कर्दमाभागात् अतः शाकटतन्मार्गो यस्यां सा तत्त्वानाशरशरास्य विभ्राणा पुष्टता
पोषच्छवपरिपाकलक्षणाः नाविभ्राणावीनापक्षिणां भ्राणा यत्रसाविभ्राणा नविभ्राणाऽविभ्राणानअविभ्राणानाविभ्रा

१०३
103

णापङ्क्तिशब्दसहितेत्यर्थः ॥ नवा प्रशस्ता ॥ १६ ॥ मधुपेति जगतः श्रियं अभूत कीदृशं मधुपराज्या भ्रमरपङ्क्त्या पराजितानि
मानिनीजनमनांसि याभिः एवंभूता याः सुमनसस्ताभिः सुरभिवारिणो वारिजानां विलसवो अभाजीवा यत्र ततः स्फुटिता
नि विकसितानि तानि मनोहारणापालोकितानि ततानि विस्तीर्णानि आम्राणां वनानि यत्र तत् केचित्तु नाहृशः सुमनसः पुष्पा
णि यत्र सुरभौ वसन्ते तस्य वसन्तस्य लक्ष्मीमित्यर्थ इत्याहुः ॥ १७ ॥ अलंकार इति ॥ शंका भयं ॥ नरो मनुष्यः विशीर्णांग
लितं वसु धनं स्यात् रोगी रीश्वरस्य अमरा देवाः ॥ वक्रेति कुटिलाकोरविधौ वालचन्द्रे श्लेषः प्रतिकूलाद् दृष्टेश्च परं श्लेषो य
मिति समासघटकत्वेन पदानां श्लेषाभावो बोध्यः समासस्य परत्वात् प्राधान्यत्वात् ॥ १८ ॥ पृथुकेति ॥ व्याख्यातमिदम् ॥ १९ ॥ भक्ती
ति ॥ भक्तिमद्रूपविलोकनस्य कर्त्रीकर्मवा मराणि यिनीति स्त्रियां प्रथमैकवचनं नपुंसके द्विवचनं च ॥ एवमग्रेपि नीलोत्प
लस्पर्द्धित्वम् ॥ नेत्रपक्षे संनिवेशो विशिष्टानन्तु पक्षे रूपा मत्वमात्रेण नेत्रपक्षे हितमाप्तये तन्तु पक्षे नीनाई हितप्राप्त
ये ॥ नेत्रस्य नपुंसकत्वेपि निधिशब्दस्याजहल्लिंगत्वान्महानिधी इति द्विवचनं ॥ निधिर्ना शेवधिः पुमानित्यमरः ॥ तन्तु पक्षे
महानिधिः तुलोपे इति दीर्घः ॥ कुरुतां परस्मैपदद्विवचनं ॥ आत्मनेपदैकवचनं च ॥ २० ॥ महदे इति ॥ संस्कृतपक्षे हे उमे

राम
१०३

गौरि। मेममा। आगमाहरणोवेरविघोपार्जनेनं समासंगं संसक्तिं अवरक्षा। अवसरे मोहापचयो। चित्तकान्ते चित्तमोहं
सहसारूढिनिहरकोदृशो आगमाहरणो। महदेउन्मवरे संवो धनविशेषणं चैतन्नु। किंभूतं समासंगं सुरैर्देवैः संधासं
धिर्मिलनं यस्मात्तथा। किंभूतं चित्तमोहं। वहसरणं अनेकप्रसरणं। यद्वा वहसरणं संसाररूपं यस्मात्तथा। प्राकृतपद्देन
मत्स्यं रेहिरसं धर्मेनमोवज्ञामाज्ञागमागमाहरनः हरवधकशरणं। चित्तमोहमपसरउमे सहसानः। अस्मत्संबंधिनीमं।
तमोवशानमोगुणायुक्ता। अशागमोगमनं मरणं। आगमः पुनर्जन्म यस्मिन्नु ताहृशात् संसारात् हर। चित्तमोहं। मोहशा
ब्दस्य गुणवाचकत्वान् स्त्रीत्वे गुणागाइतिस्त्रेणनपुंसकत्वं॥२१॥ अयमिति हृष्टिति कंत निकरोन्याः क्षिपितु स्वरूपांव
स्तनीति वचिवशात् रेटितुत्स्या हृदि। स्वहृदये ज्ञेषु विहृत्स्तु चा॥२२॥ रजमीलि। चंद्रमौले श्वरणकमलावलोकनमेवस्सरणाउ
न्सवस्तत्समये एव परा संसम्पगासं अपूर्वीयासपन्नत्सहस्व यद्वा। अपूर्वं अहष्ठ संपन्सहसचयुस्मिन्कर्मेणि तथ
थाभवतिनयाप्रमथागरणास्तन्समहमधेजानु। चित्तकदाचिनउचितान्वितपेन्हशीसानदितोभावोनंदिनाम
हारेवसेवकविशेषनामेमम। स्यात्। अथ चीहंत्वन्नसादात्तज्ज्ञणामधेउचितरुचिः नंदितानंदकः स्वामि स्वाशांसास्या

१०५

105

त्वं दिने निसां स्यादित्युक्तमप्रथमयोः नं दिने निरन्चनत्वोऽस्मत्वं पदम् पं ॥२३॥ सर्वस्वमिति हे हर शंभो त्वं सर्वस्य सर्वस्वं यतः
पतनश्च भवस्य संसारस्य छेदेन मपरः अनन्तयोनीति उपाकारश्च नयोः सामुख्यं यन्न ताहृशं न तुवन्नेन शरीरं च जित्वा
यासि गच्छसि इत्येकोऽर्थः अपरस्मन् त्वं सर्वस्वं गत्वा महिरपापादिकं हरः त्वं छेदनमपरः वंधच्छेदं पुरो भवउपकारसामुख्य
नयन्मायय यश्चायासोऽस्यास्तीति आयासिवन्नेनं न पश्चयोरियोगिज्ञो विनं तत्तु किस्मारयसर्वस्वादिकं त्वत्तानपृः कार
ययेनमोक्षः स्यादिति तात्पर्यार्थः ॥२४॥ यो सकृदिति ॥ राजपक्षे यः असकृत् अनेकवारं परगोत्राणां शत्रुवर्गाणां पक्ष
स्यच्छेदे दक्षो नैव क्षमः यद्वा धेरस्तु पेक्षरोडुम्सवे योग्यः शतकोटीदेवानीतिश्शतकोटिदः अतन्नो विमृतन्विबुधेन्द्रः पदितिस्त्र
इः ॥ सम्पकृतो राजा इन्द्रपक्षे यः परगोत्राणां श्रेष्ठगिरीणां पक्षः पतत्रं न छेदे दात्मस्वक्षमः शतकोटिना वज्रेण घनिस्त्र
मुरानखंडयनिताहृश्चः विबुधेन्द्रः देवराजः ॥२५॥ स्वयं चेति ॥ अत्र स्वयं चेति पाठे न केवलं महत्त्वं वृधित्वं नैव म्लाघनी
याकिं तु स्वयमप्येवं भ्रतार इत्यर्थः इयं चेति पाठे प्यय स्वाथः ॥ गौरीपक्षे पल्लववन्नाम्नोभास्वनो चयोकरोतान्पाविरा
जिनी मुखेनापनेइति स्वापं स्वत्मन्ययः ॥ मस्वाप मस्वापं दुःखप्राप्तनातृज्ञायन्फलं मोक्षादि नत्रेयतलब्धा सेत्यामी हि

राम

१०५

नमदाइस्थदात्री प्रभात संध्यापक्षे तु पल्लववनामैर्भास्वत्करैः सूर्यकिरणैर्विराजिनी। अस्वापो निद्राभावस्तद्रूप प्रफुल्लेस्तुच्च
जनेहितमदाइस्थदात्री॥२६॥ स्तोकनेति स्तोकमल्पमुन्नतिमुन्नमनमहंकारश्च अधोगतिमधःपतनं दर्पभ्रंशं च। भुव
नादिषु तत्वनिरूपको द्रव्यविशेषस्तूला। कोटाइ(?) तिप्रसिद्धं तस्याः कोटिः शिखरं शलाका॥२७॥ कमलमिति। कचति।
शोभते॥२८॥ सकलकलमिति। कलशब्दवत्सकलकलावत्वेत्यर्थः॥२९॥ देव त्वमेवेति। हे देव हे राजन् हे विभो च मवार(?)
पातालं अतलं अतिशयेन पातालनागलोकश्चतलं। आशानां याचकवांछानां निबंधनं विषयः निर्वाहको वा दिशामाश्रया
भूलोकश्चतलं चामराणां ये मरुतः तद्भूमिस्तत्पात्रं। पक्षे अमराणां देवानां मरुतां च देवविशेषाणां च भूमिः स्वर्गलोकः लो
को भुवनजनश्च॥३०॥ अबिन्दुसुंदरीति बिंदुरूपमालावर्णपविद्धमनीजितविरोधः अस्तु पीति विविनंडु(?) सुंदरीति नन्दुगः अ
त्र श्लेषस्य प्रतिभामात्रं विरोध एव चालंकारः। ननु विपरीतं। अन्यथा श्लेषं विना विरोधाभासस्यासंभवात्तद्धि लयापत्तेरि
ति भावः॥३१॥ सद्वंशेति वंशः कुलं वेणुश्च॥३२॥ नाल्पइति श्लोको यशः पद्यं च महान्भवानल्पः कविरिव न स्वल्पश्लेषकृ
इत्यर्थः॥३३॥ अनुरागप्रेमविशेषा रक्तिमा च पुरःसरो अग्रगामी संमुखश्च समासोक्तिरिति अभिधाया नियमनादर्थे

१०५
105

हृपावेधे नश्लेषासंभवः किंतु श्लिष्टविशेषणमहिम्ना नायकत्वं ज्ञानमपीति मात्रमिति भावः ॥३४॥ आराध्येति। अचलंय
वैनं निष्क्रियं च चापो धनुः अहीनं सर्पराजं धनुर्दण्डाद्यनभिन्नं च। विषदृष्टिः त्रिलोचनः विषमेलक्ष्यात्स्म्यत्रदृष्टिश्चञ
चक्षुर्मे विभुः गुणानन्तगुणभिन्नश्चखण्डरूपं शरण्यं शान्तसहस्रीं च ॥३५॥ मारेति। उमामेशं दिश्यपादिस्पन्दयः किंभूता। मारस्य
मदनस्यारिः शंभुः शङ्करः रामः परशुरामादिः इभमुखो गणेशः रणे रासारेण रणधारासंपातेन तस्य परहउद्रेकः अधि
क्षेपः तेन करणे सारं यथा स्यात्तथा रक्षस्तवानेषां हरादीनां मार्तिः पीडा न तन्नाशासमा ॥३६॥ मानेति। नतानां माता व
त्सला प्रियां संघहः सर्वासां सहगा सानंकी रणस्थाने। वाधिन संभ्रमा। हरीक्षमनजनभया। मान्या। माननीया। रामा
णां रमणीयानां सीमा। अनङ्गपरं रमणीयतानां मात्रेति भावः युग्मं ॥३७॥ सरलेति। शरद्गणेनेपद्ममिरमूः सरलामे
घादिकौटिल्यरहिता। शरच्छरकाण्डलानीति वा। शरदिश्शरकाण्डसंपन्नः बहलारंभतरलानां प्रचुरसंरंभचंचलानां
अलिवलानां भ्रमरसमूहानां आरवो यस्यां सा वा रला भिहंसीभिर्बहला। बहलहंसीकेसर्यः। अमंदा उच्चकाः क
रंलांतिमराजानो यस्यां अलिवहलः प्रत्यक्षपक्षस्तद्दमलानिर्मला। कलपक्षेपमलानां रागवाहल्यादिस्पर्यइति काव्य

राम
१०५

न। मुरजं वाद्यभांडविशेषः ॥३८॥ भासनेति। हे प्रतिभासार। प्रज्ञाश्रेष्ठ तेसभाभासने। कीदृशी सभा रसैः प्रीतिरूपैः शृंगारादि
भिर्वा आभा नाशो भिन्नाशो भिन्ना अहता विभा दीप्तिर्यस्याः सा भाविनी निश्चिनः परमात्मायुस्थान तज्ज्ञविशिष्टेत्यर्थः। भावि
नः वशीकृतआत्माय येति वार्थः। वारकथायामुभानिपुणादेवा भा। रेवनुत्या। वनेसाश्चये। ॥३९॥ रसेति। हे रसायाः पृथिव्या
श्रेष्ठ रक्षणस्त्वं रसा पृथिवी तु सर्वं भूतास्फुरवीपेस सत्कशब्दः। कीदृशी रसा। क्षमः रंवडिमोऽयः शुभावहा विधिर्येषां ने दुर्जे
नास्तान् स्थितिनाशयति सा क्षमाय सा। येषां न कमेरिता पुनः। कीदृशी अमासा। अनुपक्षयानस्तउपक्षये। अर्थसंवोधनं वि
शेषणानि सारसायनाख। पद्मायतलोचन। सानंता शिनं अवानं अज्ञानं येन मा दृशा वा धामोगैस्यर्थेन याज्ञानार्थस्त्व।
अनंतं अनत्यं राजि रदा तिनाहृशा नस्थ तत्वस्य नन्नूकरणे। ॥४०॥ अरिवृधेति। अवनिमतलतिलको भाति। कया सदानसा
सतामानता। यद्वा सदा अनता सास्तु इषन्मतनया। कीदृशः अरिवधदाइहायेषां तानश्शरिताः शारयुक्तामो धानी रयति
प्रेरयति युस्ताहृशाइत्यर्थः। यत्तु अरिवधे देहं शारीरं यस्य प्रतिव्याख्यानं तन्न द्वितीयस्य परस्य परिवृत्तिसहत्वेनाभयालं
कारतापत्तेः शब्दमात्रालंकारोदाहरणात्ताउपपत्तेः। सहसाहवे नरथिभिः सुष्ठु उन्नाः संवद्धाः तुरगाः पदाताश्च यस्य सः

स्थिरतायामगः पर्वतः ॥ ४१ ॥ चकास्तीति । अंगनासु रमंते इत्यंगनारामाः विरहशून्याः अंगने आरमंतीति वा । अंगने
षु आरामाः क्रीडावनानि येषामिति वा कौतुकेन स्वसंगीतादिना य आनंदस्तदुद्भवः मुक्तविषये मनांसि येषां । शोभना
नि वा मनांसि येषां ते सुमनसः विबुधाः पंडितश्रेष्ठाः ॥ ४२ ॥ नन्विति । असौ जिल्लजेयपुत्रः श्रीहरिः सिंहः प्रसिद्धसिंहे
भ्यो विलक्षण इत्यर्थः । ननु वपुः क्रूरशरीरेऽपि करिणां । प्रशस्तशुंडादंडशालिनां कुंजराणां गजश्रेष्ठानां रुधिरे
णारक्ता लोहिताः खरास्तीक्ष्णा नखरा यस्य सः तेजसः परोत्कर्षो यस्य समनाया धामस्थानानि यानि महांसि तैः पृथु
मशास्ते मनो येषां तेषामिंद्रः ईश्वरः । इति परमैश्वर्यं अस्मान् रक्ष ॥ ४३ ॥ इति नवमोल्लासः ॥ स्वैरपीति वैरिभिः स्व
भेतितवविजयानुभवादित्यर्थः प्रभावं नयो विशेषावाभव उत्पत्तिर्यस्य तमित्यर्थः । समरेष्विति समरेष्वत्र यत्नस्तस्मात् क्रमि
कप्रकारवाचिप्रत्ययांतं यथादिशब्दयोगे यद्रूपमेवं भवति स्वाधीनप्रतिक्रमनद्रूमेवंनीति पंडयप्रश्रोरिति उभयविशेष्यको
बोधः पश्चात्तत्पन्नदगंधमर्मस्पृशो बोधास्ता साहृदयफलतिराज्ञः कांतस्य चतुर्विधप्रतिविंबभावः जराल्लिंगितस्य प्राधिकरणाकसा
गाभावेऽनुगामी साधारणधर्म इति बोध्यं । १ । चकितेति भीतहरिणावत्वचलनेत्राया इत्यर्थः कुधिकोपितत्रापिकं तिमित्साह

नरूपेणनितन्तरां तरुणावज्रायुधस्य शिरसो मनोहरा कान्तिर्यस्य नत इति आननविशेषणं संभ्रमं हर्षे सम्भ्रमे सति नम्राननं च समित्यत्र
प्रथमं साहस्रपवरस्त्र मिरं ह्युपमिति विबोधयत्यात्मनसा व्यंजनया वा परस्यानिरूपितसाधारणधर्मसंबंधमतीति रिति धेयं। अत्र
रणसहस्राकांतिमत्वं साधारणो धर्मः। २। अतोपायेनेतिनि। आयनिरुद्धर्कं पुष्टिदृष्टी येन ताश्च उद्धानानागर्ववतां दानवतां चरितैश्चार
त्कृष्टैः रखरोज्जीवै— माभिः प्रकृष्टशोभावद्भिर्भावैः कर्त्रीभिः क्षिप्रं अत उपायमयैः अपायाभावसंयुतैरुपायैः सा मम भद्रदानवि
गाहे: अरः एतन्नभुवनं तलक्ष्मीः कमलासंपद्यं भुंजे रिवोपायैरित्यत्र भुजसाहस्रप्रयोजकसात्यत्वादि धर्मवद्भिरित्यादिरेव
बोधः। गजावनंग घटनीव स्मरः समरभूमिं गघतीसा दैत्यक्रियात्मसम भिस्ताहनेवादेरत्नेत्ता घोतकत्वमेवेति नतत्रोपमात्तेका
रः स्पष्टं चेदं सन्निधायकेभाष्ये। ३। अवितयेति अत्यर्थं वांछितविषयविस्तारे प्रकृष्टगुणानां गरिस्त्रगीताश्वीर्यस्य घोत
कया रीतिघोतकपरबोधकपरं। गांभीर्येति गांभीर्यं दुर्ज्ञेयानः करणत्वं अनलस्पर्शित्वं च भुजंगउपपत्तिः समुद्रः शत्रनोर
वपतित्वान्दुरालोकः दुःखेनालोक्यं तुशाका। अंबरस्त्नसूर्यः। अत्रबोधउक्त दिशोह्यः। उन्नरत्नोन्निदाघावरस्त्वतुलाभिज्ञो
दुरालोक इति बोधः। तुल्यत्वप्रयोजकं च दुरालोकत्वमिति पश्चात्मनसा व्यंजनया वा बुध्येत। सचेत्यम् उपमानं दुरालोक इति

दार्यांवररत्नाभिन्नोडुराल्गेकोराजेत्येवमितिबहुव्रः ॥ ४ ॥ धर्मस्येति । अनन्यमात्मस्येतिबहुव्रीहिः चिन्तइतिसंबोधनं । ५ । आहू
